# वराहोपाख्यानम्

*बुद्धदेवः बोधिसत्त्वः आसीत् । तस्य बहुविधाः अवताराः आसन् । बोधिसत्त्वस्य जन्मकथाः जातककथारूपेण परिचिताः । ताः कथाः अतीव नीतिपूर्णाः सन्ति, शिशूनां मनांसि च रञ्जयन्ति । प्रस्तुतं वराहोपाख्यानं जातककथातः संगृह्य सम्पादितम् ।*

पुरासीत् बिन्ध्याद्रेर्गुहायां कश्चित् बुद्धांशसंभवो वराहः सुहृदा मर्कटेन समम् । स सर्वसत्त्वहितकृत् तेन सख्या युतः सदातिथीन् पूजयन् स्वोचितैः नियमैः कालमनयत् । एकदा तत्र पञ्च वासरान् दुर्दिनमभवत् । तत्र अविच्छिन्नजलधारया प्राणिनां यावत् दुःखमभूत्, तन्न केनापि वर्णयितुं शक्यते।

पञ्चमेऽहनि निशि कपिना बन्धुना सहितस्य सुप्तस्य वराहस्य गुहाद्वारि कश्चित् भार्यासुतयुतः सिंहः समाययौ । स सिंहस्तत्र दुर्दिने तां सिंहीमवादीत्, ''प्रिये ! अद्य प्राणिनो यदि न प्राप्नोमि, तदा क्षुधया मरिष्यामि ।'' तदाकर्ण्य सिंही अवोचत् ''नाथ ! सर्वथा एव वयं क्षुधया न जीवामः । तदेकां मां भुक्त्वा युवां जीवतम् । त्वं हि मे प्रभुः, अयञ्च पुत्रः प्राणभूतः आवयोः सर्वस्वम्, अतो मदीयेन कायेन युवयोः गतिरस्तु ।''

एवमन्योन्यसन्तापं जल्पतोस्तयोः दैवात् प्रबुद्धः स महाशयो वराहः शुश्राव । स संहृष्टः अचिन्तयत्, ''दिष्ट्या क्वेयं निशा, क्व च दुर्दिनं, क्व वा ईदृशातिथिलाभः । अहो मे भाग्यम् ? किमनेन क्षणविनाशिना कुदेहेन ? इमं दत्त्वा अहमतिथीन् तर्पयामि ।'' इत्यालोच्य स वराहः निर्गत्य स्निग्धया गिरा तं सिंहं जगाद, ''भद्र ! मा विषादस्त्वया कार्यः । ससुतस्य सदारस्य ते अहं भक्ष्यः प्राप्तः । तन्मां भुङ्क्ष्व ।''

अथ शूकरेण एवमुक्तः केशरी हृष्टः भार्यामवादीत् – ''प्रिये ! पूर्वमयं शिशुः भुङ्क्ताम्, ततोऽहं भोक्ष्ये । अनन्तरं त्वं भोक्ष्यसे ।'' तया तथेत्युक्ते पूर्वं सिंहशावकेन भक्षिते ततः सिंहः तस्य क्रोड़स्य मांसानि भोक्तुमुपचक्रमे । भुञ्जानं तं स महासत्त्वः शूकरः प्रोवाच, भद्र ! शीघ्रं मे रक्तं पिब यावत् भूमौ न लीयते । पश्चात् मांसैश्च तृप्यस्व, शेषं ते प्रिया अश्नातु ।''

इति श्रुत्वा सिंहेन क्रमात् भुक्त्वा अस्थिशेषतां नीतोऽपि शूकरः प्राणैः न व्ययुज्यत । अत्रावसरे सा सिंही क्षुधार्त्ता तत्र व्यपद्यत । स च सिंहः ससुतः क्वापि अगात् । रजनी च क्षयमयासीत् ।

अत्रान्तरे प्रबुद्धः स सखा मर्कटः तं वराहं तथाभूतं दृष्ट्वा ससम्भ्रममप्राक्षीत्, ‘‘सखे ! केन ते इयमवस्था कृता, ब्रूहि यदि ते शक्तिरस्ति ।’’ तदाकर्ण्य धीरः स शूकरः अतिकृच्छ्रेण तद् यथावृत्तमवदत् । ततो रुदन् स कपिस्तं पादयोः प्रणिपत्याब्रवीत्, ‘‘सखे ! त्वं देवांशः, येनात्मा तिर्यक्त्वात् मोचितः । किञ्चिदभिलषितं मे ब्रूहि तदहं ते संसाधयामि ।’’ इति तेन कपिनोक्तः स वराहः प्रत्यब्रवीत्, ‘‘वयस्य ! यो मे अभिलाषः, स विधिनापि दुःसाध्यः । येन पश्यतो मे इयं तपस्विनी सिंही मृता । इयं पुनः पूर्वाङ्गं संप्राप्य प्राप्तजीविता मां भुक्त्वा तृप्यतु इति मे चेतो वाञ्छति ।’’

एवंवादिनं तं धर्मः स्वयं प्रत्यक्षीभूय पाणिना परामृश्य दिव्यदेहं मुनीन्द्रम् उवाच ! ‘‘भद्र! मयैव इयं माया कृता । त्वया नु अखण्डसत्त्वेन परार्थप्राणदायिना मामपि विजित्य धर्मस्य पराकाष्ठा दर्शिता ।’’

तदाकर्ण्य स मुनीन्द्रः पुरः स्थितं धर्ममालोक्य अब्रवीत्, - ‘‘देव ! अस्मिन् सख्यौ मर्कटे असन्त्यक्ततिर्य्यक्त्वे इयं प्राप्तापि मुनीन्द्रता न मां प्रीणाति ।’’ एतदाकर्ण्य धर्मस्तमपि मर्कटं मुनिमकार्षीत् । महद्भिः सह संगतिः ध्रुवं महते फलाय । अथ स धर्मः तिरोदधे । सा मृता सिंही चान्तर्दधे ।

**(जातककथा)**

## टिप्पणी :

विन्ध्याद्रेः - विन्ध्य + अद्रेः – ବିନ୍ଧ୍ୟପର୍ବତରେ, गुहायाम् – ଗୁମ୍ଫାରେ, गुहाद्वारि – ଗୁମ୍ଫା ଦ୍ୱାରରେ, कायेन – ଶରୀରରେ, जल्पतोः – କଥାବାର୍ତ୍ତା ହେଉଥିବା ଦୁହିଙ୍କର, संहृष्टः – ଖୁସିହୋଇ, प्रबुद्धः – ଜାଗ୍ରତ, दिष्ट्या – ଭାଗ୍ୟବଶତଃ, स्निग्धया गिरा – ସ୍ନେହପୂର୍ଣ୍ଣ କଥାରେ, भुङ्क्ष्व – ଖାଅ, अश्नातु – ଖାଉ ।

## अभ्यास :

**1. निजभाषया प्रायशः वाक्यत्रयेण उत्तरं लिखत ।**

(क) वराहः केन भावेन समयम् अतिवाहयति स्म ।

(ख) सिंही क्षुधाक्रान्तं सिहं किम् अवदत् ?

(ग) सिंह्याः वाक्यं श्रुत्वा वराहः किम् अचिन्तयत् ?

(घ) वराहः स्नेहपूर्णवाक्येन सिंहं किम् अवदत् ?

(ङ) क्रोड़स्य मांसं भुञ्जानं सिहं महासत्त्वः वराहः किम् उवाच ?

(च) कपि: कथं वराहस्य पादयो: प्राणमत् ?

(छ) पादयो: प्रणमन्तं कपिं वराह: किं प्रत्यवादीत् ?

(ज) धर्म: प्रत्यक्षीभूय वराहं किम् उवाच ?

(झ) मर्कट: केन भावेन मुनित्वं प्राप्त: ?

**2. संक्षेपेण उत्तरं लिखत ।**

(क) कस्य पर्वतस्य गुहायां मर्कटेन सह वराह: आसीत् ?

(ख) वराहस्य क: बन्धु: आसीत् ?

(ग) कै: सार्द्धं सिंह: वराहस्य गुहाद्वारम् आगत: ?

(घ) क: प्राणभूत: इति सिंह्या उक्तम् ?

(ङ) क्षुधया मरिष्यामीति क: उक्तवान् ?

(च) कयो: कथोपकथनं वराह: श्रुतवान् आसीत् ?

(छ) वराह: किं दातुं स्थिरीकृतवान् ?

(ज) सिंह: कथम् आनन्दित: आसीत् ?

(झ) वराहस्य मांसं प्रथमत: क: भक्षितवान् ?

(ञ) वराहस्य क्रोडस्य मांसानि केन भक्षितानि ?

(ट) वराह: अस्थिशेषतां कदा प्राप्त: ?

(ठ) वराहस्य चेत: किं वाञ्छति स्म ?

(ड) वराहस्य सम्मुखे क: आविर्भूत: आसीत् ?

(ढ) धर्मस्य पराकाष्ठा केन दर्शिता ?

(ण) धर्म: कं प्राणिनं मुनिम् अकार्षीत् ?

(त) कै: सह संगति: महते फलाय भवति ?

**3. बन्धनीमध्यात् रेखाङ्कितपदानां कारकविभक्तिगतं शुद्धम् उत्तरं चिनुत ।**

(क) तत्र केनापि वर्णयितुं शक्यते । (प्रयोजनार्थे तृतीया, सहार्थे तृतीया, अनुक्ते कर्त्तरि तृतीया)

(ख) नाथ ! सर्वथा एव वयं क्षुधया न जीवामः ।

(कर्त्तरि प्रथमा, सम्बोधने प्रथमा, अव्यययोगे प्रथमा ।

(ग) किमनेन क्षणविनाशिना कुदेहेन ? (प्रयोजनार्थे तृतीया, अनुक्ते कर्त्तरि तृतीया, हेतौ तृतीया)

(घ) ब्रूहि, यदि ते शक्तिरस्ति । (कृद्योगे षष्ठी, अतसर्थप्रत्यययोगे षष्ठी, सम्बन्धे षष्ठी)

(ङ) शूकरः अतिकृच्छ्रेण तद् यथावृत्तम् अवदत् ।

(हेतौ तृतीया, प्रकृत्यादिभ्यः तृतीया, करणे तृतीया)

(च) भद्र! मयैव इयं माया कृता । (उक्ते कर्मणि प्रथमा, कर्त्तरि प्रथमा, अव्यययोगे प्रथमा)

(छ) धर्मस्तमपि मर्कटं मुनिमकार्षीत् ।

(कर्मणि द्वितीया, क्रियाविशेषणे द्वितीया, अत्यन्तसंयोगे द्वितीया ।)

(ज) महद्भिः सह संगतिः ध्रुवं महते फलाय ।

(अनुक्ते कर्त्तरि तृतीया, सहार्थे तृतीया, प्रयोजनार्थे तृतीया)

**4. वाक्यरचनां कुरुत :**

क्षुधया, अनन्तरम्, मांसैः, इति, अपि, यदि, कपिना, एवम्, मया, विजित्य, पुरः, आकर्ण्य ।

**5. अधोलिखितपदानां सन्धिविधानं कुरुत :**

सदा + अतिथीन्, पञ्चमे + अहनि, तत् + एकम्, अचिन्तयत् + च, इति + आलोच्य, पूर्वम् + अयम्, मांसैः + च, क्व + अपि, इयम् + अवस्था, कपिः + तम्, तत् + अहम्, विधिना + अपि, मया + एव, धर्मम् + आलोक्य, प्राप्ता + अपि,

**6. अधोलिखितपदानां सन्धिविच्छेदं कुरुत ।**

कालमनयत्, सिंहस्तत्र, गतिरस्तु, किमनेन, एवमुक्तः, तातोऽहम्, अत्रावसरे, शक्तिरस्ति, येनात्मा, कपिनोक्तः, पश्यतो मे, मामपि, मुनिमकार्षीत्, चान्तर्दधे ।

**7. बन्धनीमध्यात् विग्रहवाक्यं/समस्तपदं/ समासनाम चित्वा शुद्धम् उत्तरं लिखत ।**

(क) गुहाद्वारि (गुहायाः द्वारं तस्मिन्, गुहायाः द्वाः तस्याम्, गुहायाः द्वाः तस्याः) ।

(ख) जलस्य धारा तया (जलधारेण, जलधारया, जलधाराया:) ।

(ग) यथावृत्तम् (बहुव्रीहि:, कर्मधारय:, अव्ययीभाव:) ।

(घ) बिन्ध्यो नाम अद्रि: तस्य (बिन्ध्याद्रौ, बिन्ध्याद्रे:, बिन्ध्याद्रि:) ।

(ङ) महाशय: (महान् आशय: यस्य स:, महत: आशयस्य स:, महताम् आशय:) ।

(च) सदार: (सहार्थ बहुव्रीहि:, कर्मधारय:, अव्ययीभाव:) ।

(छ) सिंहशावकेन (सिंहस्य शावक: तेन, सिंह्या: शावक: तेन, सिंहाय शावक: तेन) ।

(ज) न खण्डम् (नास्तिखण्डम्, अखण्ड:, अखण्डम्) ।

(झ) महान् चासौ सत्त्व: चेति (बहुव्रीहि:, कर्मधारय:, तत्पुरुष:) ।

**8. बन्धनीमध्यात् शुद्धं प्रकृतिगतं प्रत्ययगतं वा उत्तरं चित्वा शून्यस्थानानि पूरयत ।**

(क) पूजयन् = पूज् + _____ । (स्वार्थे णिच् शतृ, शतृ, ल्युट्)

(ख) भुक्त्वा = _____ + क्त्वा । (भुज् , भुञ्ज् , भोज्)

(ग) संहृष्ट: = सम् + हृष् + _____ । (क्त, घञ् , शतृ)

(घ) लाभ: = लभ् + _____ । (शानच् , घञ् , तुमुन्)

(ङ) निर्गत्य = नि: + गम् + _____ । (क्त, शतृ, ल्यप् )

(च) प्रबुद्ध: = प्र + बुध् + _____ । (क्तिन् , क्त, शतृ)

(छ) रुदन् = _____ + शतृ । (रोद् , रुद् , रुध् )

(ज) प्रणिपत्य = प्र + नि + _____ + ल्यप् । (पत् , पा, पुष् )

(झ) परामृश्य = परा + _____ + ल्यप् । (मृ, मृश्, मा)

(ञ) विजित्य = वि + _____ + ल्यप् । (जै, जि, जुत्)

(ट) दर्शिता = दृश् + णिच् + _____ + टाप् । (अनीय, क्त, क्तवतु)

**9. स्त्रीप्रत्यये रूपाणि लिखत ।**

सुत, शूकर, केशरिन्, सखि, कपि, तपस्विन्, जीवित, मुनि, कृत ।

■